अन्यैरज्ञायमानस्त्वजामि निजपदानुषङ्गिणीं मुवमिति विचिन्त्य ··· अलक्षितक्रमेण निर्गत्य UdaySuKa. 57.16; 100.10.

अज्ञायमानकरण (ajñāyamāna-karaṇa) *n.* means or instrument (of knowledge) which is not being known अज्ञायमानकरणजं ज्ञानम् NyāyKuA. ii(1). 238.1; अज्ञायमानकरणजन्यः तत्त्वानुभवः प्रत्यक्षप्रमा SaptaPa. 142 (40)

अज्ञायमानकार्य (ajñāyamāna-kārya) *n.* effect that is not being known अज्ञायमानकार्यस्य दृष्टिसृष्टिपक्षे अनङ्गीकारात् LaCandr. 535.25; अज्ञायमानकार्यानङ्गीकारेण तादृशसंस्काराद्यसंभवः GuruCandr. ii. 337.22.

अज्ञायमानजन्मपरंपराक (ajñāyamānajanmaparamparā-ka) *adj.* of unknown lineage (*lit.* series of generations) अज्ञायमानजन्मपरंपराकेऽसद्गोत्रज इत्येवमाकारमात्रज्ञानगोचरे गोत्रजे ··· सद्यः शौच(? चम्) इति VīraMi. 800.3 (*on* 3.24–25)

अज्ञायमानज्ञान (ajñāyamāna-jñāna) *n.* knowledge which is not being known न ह्यज्ञायमानज्ञानसद्भावे किञ्चिन्मानम् TattvPrakā. 4A.8 (*on* i. 1.1)

अज्ञायमानता (ajñāyamāna-tā) *f.* the state of not being known दीनेषु परिपाल्यताबुद्धिः···करुणा···तस्याः आन्तरत्वेन अज्ञायमानतया LalitāTriBh. 300.19 (*on* 28); अवज्ञा सा प्रकृष्टस्य यत्तथाज्ञायमानता BhāvPra.(S'ā.) 71.1 (3)

अज्ञायमानतादशा (ajñāyamānatā-daśā) *f.* the state of being unknown अज्ञायमानतादशायाम् ··· तस्य प्रत्यक्षहेतुत्वम् ··· न कल्प्यते GuruCandr. ii. 346.19; LaCandr. 537.25.

अज्ञायमानत्व (ajñāyamāna-tva) *n.* the state of not being known or cognised सन्नप्यज्ञायमानत्वादसन्नित्यभिधीयते S'lokaVār. 7.101 (874.1); AṇuBh. 57.23 (*on* i. 2.9)

अज्ञायमानार्थत्व (ajñāyamānārtha-tva) *n.* nature of unknown substance or matter लोमादयः पश्ववयवा वेदे चोदिताः सन्तोऽध्वर्य्वादिभिः स्वयमज्ञायमानार्थत्वाद्वेचे नित्यं प्राणिवधाभियुक्तास्तेभ्य एवावधार्य विनियुज्यन्ते TantrVā. 158.21 (*on* i. 3.9)

अज्ञायमानदशा (ajñāyamāna-daśā) *f.* the state of not being known तदुपलक्षितस्य विषयस्याज्ञायमानदशायामपि भयादिहेतुत्वप्रसङ्गात् S'atDū. 133.18.

अज्ञायमानदुष्टसंसर्ग (ajñāyamāna-duṣṭasaṁsarga) *m.* poluting touch of which is not known अज्ञातभुक्तशुद्ध्यर्थं अज्ञायमानदुष्टसंसर्गभुक्तान्नदोषनिवृत्त्यर्थम् ManvaVi. 599.14 (*on* 5.21)

अज्ञायमानदेशत्व (ajñāyamānadeśa-tva) *n.* the state of being one whose place is not known मूलं विक्रेता स चाज्ञायमानदेशत्वादनाहार्यः Aparā. 776.18 (*on* 2.170)

अज्ञायमानदोष (ajñāyamāna-doṣa) *adj.* of unknown sin अपाङ्क्त्योपहता अज्ञायमानदोषापाङ्क्त्योपहता ManvaVi. 390.5 (*on* 3.183)

अज्ञायमानवचन (ajñāyamāna-vacana) *n.* statement as being not known ज्ञायमानेऽप्यज्ञायमानवचनमितरप्रशंसार्थम् TantrVā. 31.16 (*on* i. 2.14)

अज्ञायमानस्वामिक (ajñāyamānasvāmi-ka) *adj.* (property) the owner of which is not known or traced पुराणमिति वदन्नज्ञायमानस्वामिकत्वं दर्शयति Aparā. 640.14 (*on* 2.34); स (निधिः) द्विविधो ज्ञायमानस्वमिकोऽज्ञायमानस्वामिकश्च DaṇḍaVi. 286.8; 291.2.

अज्ञायमानार्थ (ajñāyamānārtha) *adj.* **i** (word or sentence) sense of which is not being understood यदि चोदकेन कर्तृविशेषो दीक्षायां न लभ्यते; ततो वचनेनापि न लब्धुं शक्यते तद्वर्तिनां पदानामज्ञायमानार्थत्वात् NyāyRaMā. 153.24; वाक्यमज्ञायमानार्थमविज्ञातार्थमुच्यते TārkiRa. 335.3; *m.* **ii** unknown object अज्ञाननिवर्तकान्येव सर्वाणि ज्ञानान्येष्टव्यानि अज्ञायमानार्थविषयत्वाविशेषात् IṣṭaSi. 64.10.

अज्ञाविशेष (ajñāviśeṣa) *m.* non-difference from the ignorant तज्ज्ञा अपि हि अज्ञाविशेषेणैव शरीरयात्रानिमित्तं यावच्छरीरं व्यवहारं कुर्वन्त्येव Bhāsk. i. 392.19 (*on* i. 7.14)

अज्ञाविद्ध (ajñāviddha) *adj.* not penetrated with (i. e. not containing) wrong things भारतं मानवो धर्मः साङ्गवेदं चिकित्सितम् । अज्ञाविद्धानि चत्वारि न हन्तव्यानि हेतुभिः VṛGautSm. 512.17 (3)

अज्ञावृता (ajñāvṛtā) *adj.* (*f.*) surrounded by ignorant men or fools गायनक्षपिता लक्ष्मीः दस्युनिर्दालिता दिशः । कायस्थदुःस्था पृथिवी राज्ञामज्ञावृताः सभाः DaśāvaC. 10.13.

अज्ञास् (á-jñās) *adj.* without an acquaintance अनापिरज्ञा असजात्यामतिः । पुरा तस्या अभिशस्तेरवस्पृतम् ṚV. x. 39.6.

अज्ञासंभव (ajñāsambhava) *m.* impossibility of an ignorant अतोऽज्ञासंभवादेव नाधिकारैक्यवादिनाम् UpādhiKha. 2A.1.

अज्ञिका (ájñi-kā) *adj.* (*f.*) an ignorant (woman, lady) भस्त्रा ··· ज्ञाद्वास्वा इत्येतेषां नञ्पूर्वे असेऽपि आतः स्थाने यो अकारस्तस्य वा इद् भवति । ··· अज्ञिका JaineVyā. 367.18 (*on* v. 2.52); CāndraVṛ. *on* vi. 1.72; KāśiVṛ. *on* vii. 3.47.

अज्ञित (ajñi-ta) *adj.* not defeated or conquered (by others) घोरद्रवचक्रजिताज्ञितारिम् ··· गे त्वाम् DhātuKā. 2.35 (comm. अज्ञिताः अन्यैरनभिभूता अरयो येन)

अज्ञेय (a-jñeya) *adj.* **A** unknowable (Brahman, Supreme Being, Viṣṇu etc.) असंप्रतिकमज्ञेयं ब्रह्म यत्सदसत्परम् BrahmāṇḍP. i. 3.11; स्वरूपेण स्वयं नात्मा ज्ञेयोऽज्ञेयोऽथवा ततः UpadeSā. 262.48; अज्ञेयं तु कल्पितं कृत्वा तदपोहेन ज्ञेयशब्दः प्रवर्तते S'arka. 68.6; 68.20; शिव एव तच्चोदकः स ज्ञेयो ज्ञातैव ParāTri. (comm.) 257.7; नन्वज्ञेयमिदं भवेद्यदि मम प्रत्यक्स्वरूपम् SaṁkṣeS'ā. 1.244 (i. 188.5); न ह्यसदज्ञेयं वा किञ्चिदवगतं यद् व्यवच्छिद्यते NyāyMañ. i. 279.11; अज्ञेयम् ··· तं वासुदेवं शरणं प्रपद्ये VāmaP. 85.46; (शिवम्) केचिज्ज्ञेयमिति प्राहुरज्ञेयमिति केचन S'ivaP. vii(2). 5.33 (550B.10); परमेश्वरः स्वात्मानं ज्ञात्रेकरूपत्वादज्ञेयमपि ज्ञेयीकरोति PratyabhiVi. i. 268.1 (*on* i. 5.15); न हि जात्यन्धो नीलं ज्ञातुं निर्वक्तुं वा न शक्त इत्यज्ञेयानिर्वाच्यमेव तल्लोक इति ĀtmaTaVi. 499.17; मानेन केन विज्ञेयमवाच्याज्ञेयनिर्गुणम् AnuVyā. 6B.7 (*on* 1.1); 70A.8 (*on* 4.2); जीवाश्रिताज्ञानस्य चाज्ञेयेन ब्रह्मणा व्यवहारस्य च···संबन्धो न Nyāyāmṛ. 193B.7; 290B.9; **B** incomprehensible, difficult to understand के च सौम्या(? म्य)रसा ज्ञेयाः के चाज्ञेयाः प्रकीर्तिताः Hastyāyur. 631.14 (4.11); एवं हृदयमज्ञेयमगाधं वेशयोषिताम् KathāSaSāg. x. 2.54; स तत्त्वं ज्ञातवान् मन्त्री··· किमज्ञेयं हि धीमताम् KathāSaSāg. i. 4.105; नास्ति किंचिन्निपुणस्याज्ञेयम् DhūrtaViSaṁ. 21.10; *m.* name of S'iva (not knowable),S'ivaP. iv. 35.71 (392B.4)

अज्ञेयता (ajñeya-tā) *f.* the state of being not cognisable, incognisability, unknowability विशिष्टसंस्कृतिः शब्दात्सा हि न व्यतिरेकिणी । शब्दस्याज्ञेयताप्राप्तेः ततः शब्दोऽपि जायते TattvSaṁ. 2570; निषेधस्यज्ञेयतामात्रार्थः TattvPrakā. 76B.2 (*on* i. 4.28)

अज्ञेयत्व (ajñeya-tva) *n.* unknowability, the nature of being unknowable आत्मनोऽन्यस्य चेद्धर्मा अस्थूलत्वादयो मताः । अज्ञेयत्वेऽस्य किं तैः स्यात् UpadeSā. 141.2; मुख्यस्त्वात्मा ब्रह्मैव तस्यात्मत्वश्रुतेरज्ञेयत्वाच्च IṣṭaSi. 174.16; 91.14; 206.3; तदेतदिति मन्यन्तेऽनिर्देश्यं परमं सुखमित्यादिना ज्ञानिसुखस्याप्यनिर्देश्यत्वमज्ञेयत्वं चोच्यते BrahmSūBh.(Ma.) 17A.9 (*on* i. 3.22); अवाच्यत्वादज्ञेयत्वाच्छून्यमेव तदिति प्राप्तम् ViṣṇuTaNi. 17B.2; निर्गुणं वस्तु केन मानेन विज्ञेयम् । न केनापि । कुतः । अज्ञेयत्वात् NyāySu.(Ja.) 121B.5 (*on* i. 1.5); पूर्वमदृश्यत्वादिगुणाः परमेश्वरस्योक्ताः तेषामदृश्यत्वाज्ञेयत्वे कस्यचिदानुकूल्येन गृह्यमाणस्य काठके कथ्येते TattvPrakā. 50A.13 (*on* i. 3.22); नन्वेतावता रसस्याज्ञेयत्वमुक्तं भवति SāhiDa. 79.8; AdvaiSi. 535.9; तथा सति हि तस्याज्ञेयत्वेन साधकाभावरूपं बाधकं परेषूपन्यासानर्हम् SāṁkhyaPraBh. 158.13 (*on* 6.50); तत्राज्ञेयत्वात्पित्तरक्तमादायानिल ऊर्ध्वमागत्य शिरः संतापयति Hastyāyur. 145.7 (1.18)

अज्ञेयवासन (a-jñeyavāsana) *adj.* without impressions of knowable objects त्यक्तदेहो विमुक्तोऽन्यो वर्ततेऽज्ञेयवासनः YogVā. v. 16.17.

अज्ञोक्ति (ajñokti) *f.* statement of an ignorant (a foolish or wrong statement) अस्य वचनस्य निर्मूलत्वोक्तिरज्ञोक्तिरेव NirṇaSi. 381.19; सामान्यायाः कुत्राप्यनुरागो नास्तीत्यज्ञोक्तिः S'ṛṅgāMañ.(Ā.) 13.8.

अज्ञोत्था (ajñotthā) *adj.* (*f.*) arisen in a nescient एते (विचिकित्सिते) न तरतोऽज्ञोत्थे तद्वेत्त्वज्ञानवसरम् ।···ब्रह्मासीत्यात्मवेदिनम् BṛĀraUBhVā. iv. 4.1172.

अज्ञोपदेशकरण (ajñopadeśakaraṇa) *n.* the act of teaching by the ignorant (person) ज्ञानवान् मृग्यते कश्चित्तदुक्तप्रतिपत्तये । अज्ञोपदेशकरणे विप्रलम्भनशङ्किभिः PramāVā. 2.30; YaśasCam. ii. 274.17.

अज्ञोपबोध (ajñopabodha) *m.* instructing the ignorant कथमज्ञोपबोधाय योग्यं स्यान्मतमीदृशम् S'aṅkaVi.(Ā.) 106.6.

अज्दन्त्यपर (ajdantya-para) *adj.* followed by a vowel or a dental sound अथवा लक्षणं क्रियते । अज्दन्त्यपराः सादयः षोपदेशाः KāśiVṛ. *on* P. vi. 1.64; Nyās. ii. 238.19 (*on* vi. 1.64)

अज्द्वयसमुदाय (ajdvaya-samudāya) *m.* group of two (successive) vowels असत्यज्ग्रहणेऽज्द्वयसमुदायस्य प्रत्येकवर्णकालसंकलनया द्विमात्रत्वाद् दीर्घसंज्ञा स्यात् PadMañ. *on* KāśiVṛ. *on* P. i. 2.27.

अज्धर्मता (ajdharma-tā) *f.* the state of being a quality of a vowel उदात्तादीनामज्धर्मताया एव लोकप्रसिद्धत्वेन LaS'abdeS'e. i. 25.2.

अज्धर्मत्व (ajdharma-tva) *n.* the state of being a quality of a vowel अज्धर्मत्वाद् उदात्तादीनाम् Pradī. v. 181a.(*on* vi. 1.223); पारिभाषिकस्य